# 3 आत्मश्रद्धायाः प्रभावः



एकः बालकः आसीत् । तस्य नाम एकलव्यः आसीत् । सः धनुर्विद्यां पठितुम् इच्छति स्म ।

एकदा सः द्रोणाचार्यस्य समीपम् अगच्छत् अवदत् च । "गुरुदेव, अहम् अपि धनुर्धरः भवितुम् इच्छामि । कृपया मां स्वीकुरु।" आचार्यः प्रत्यवदत्, "अहं कौरवान् पाण्डवान् च पाठयामि । अहं भवतः शिष्यरूपेण स्वीकारं कर्तुं न शक्नोमि।" परंतु आचार्यं प्रति तस्य श्रद्धा शिथिला न अभवत् ।



सः आचार्यस्य द्रोणस्य एकां मूर्तिम् अरचयत् । सः प्रतिदिनं मूर्तिम् अनमत् । प्रातः अरभ्य सायंकालपर्यन्तं धनुर्विद्यायाः अभ्यासम् अकरोत् । शनैः शनैः सः कुशलः धनुर्धरः अभवत् । एकदा तस्मिन् वने गुरुद्रोणः पाण्डवैः कौरवैः च सह आगच्छत् । एकः कुक्कुरः



तान् दृष्ट्वा अभषत् । अर्जुनः धनुष्यम् उत्थापयति स्म। तदैव एकलव्यः बाणैः तस्य कुक्कुरस्य मुखम् असीव्यत् । द्रोणाचार्यः एतत्

दृष्ट्वा तत्र आगच्छत् तं च अपृच्छत्, ''कः तव आचार्यः । तदा सः द्रोणाचार्यं तां मूर्तिम् अदर्शयत् ।

एकलव्यः गुरुश्रद्धायाः स्वश्रद्धायाः च प्रतीकः अस्ति । एकलव्यः अस्मान् शिक्षयति ''स्वयंज्योतिः स्वयंप्रज्ञा भवतु'' । यदि अस्मासु आत्मश्रद्धा अस्ति तर्हि काऽपि सिद्धि दुर्लभा नास्ति ।

अनन्तरम् आत्मश्रद्धायाः बलेन सः श्रेष्ठः धनुर्धरः अभवत् ।

## टिप्पणी

**पठितुम्** ભણવા માટે **भवितुम्** થવા માટે **प्रत्यवदत्** વળતું બોલ્યા **न शक्नोमि** શક્તિમાન નથી **भवतः** આપનો **शिथिला** ઢીલી **प्रतिदिनम्** દરરોજ **शनैः शनैः** ધીમે ધીમે **तदैव** ત્યારે જ **कुक्करः** કૂતરો **अनन्तरम्** પછી **यदि...तर्हि** જો... તો... **अनमत्** નમન કર્યું **प्रातःकालात्** સવારથી **न अभवत्** ના થઈ **उत्थापयति** ઉપાડે છે **असीव्यत्** સીવી દીધું **अस्मान्** આપણને

## स्वाध्यायः

### 1. નીચેના શબ્દોનું મોટેથી ઉચ્ચારણ કરો :

एकलव्यः, धनुर्विद्याम्, द्रोणाचार्यस्य, अगच्छत्, स्वीकुरु, प्रत्यवदत्, शिष्यरूपेण, पर्यन्तम्, उत्थापयति, गुरुश्रद्धायाः, स्वयंज्योतिः, दुर्लभा

### 2. પ્રશ્નોના ઉત્તર સંસ્કૃતમાં આપો :

(1) एकलव्यः धनुर्विद्यां पठितुं कस्य समीपम् अगच्छत् ?

(2) एकलव्यः द्रोणं किम् अवदत् ?

(3) द्रोणः एकलव्यं किम् अकथयत् ?

(4) एकलव्यः बाणैः किम् अकरोत् ?

(5) द्रोणाचार्यः एकलव्यं किम् अपृच्छत् ?

## 3. કૌંસમાં આપેલા શબ્દોના આધારે ખાલી જગ્યા પૂરો :

(आचार्यं प्रति, शिक्षयति, अभषत, द्रोणाचार्यस्य)

(1) एकलव्यः धनुर्विद्यां पठितुं ______________ समीपम् अगच्छत् ।

(2) एकलव्यस्य ______________ श्रद्धा शिथिला न अभवत् ।

(3) एकः कुक्कुरः तां दृष्ट्वा ______________ ।

(4) एकलव्यः अस्मान् ______________ स्वयंज्योतिः स्वयंप्रज्ञा भवतु ।

## 4. શબ્દોના આધારે વાક્ય બનાવો :

(1) धनुर्धरः (2) बालकः (3) शिष्यः (4) कुक्कुरः

(1) ______________________________

(2) ______________________________

(3) ______________________________

(4) ______________________________

## 5. આપેલાં વિધાનો પૈકી સાચાં વિધાનો સામે 'आम्' અને ખોટાં વિધાનો સામે 'न' લખો :

(1) एकलव्यः ईश्वरश्रद्धायाः प्रतीकः अस्ति ।

(2) एकलव्यः बाणैः कुक्कुरस्य मुखम् असीव्यत् ।

(3) आचार्यं प्रति एकलव्यस्य श्रद्धा शिथिला अभवत् ।

(4) द्रोणाचार्यः एकलव्यस्य शिष्यरूपेण स्वीकारं कर्तुं न शक्नोति ।

6. ઉદાહરણમાં દર્શાવ્યા પ્રમાણે કૌંસમાં આપેલ ધાતુનાં રૂપો બનાવી ખાલી જગ્યામાં લખો :

**ઉદાહરણ :**

सः धनुर्विद्यां ______________________ इच्छति । (पठ्)

सः धनुर्विद्यां पठितुम् इच्छति ।

(1) सः अध्यापकं ______________________ इच्छति । (भव्)

(2) अहं रोटिकां ______________________ इच्छामि । (खाद्)

(3) भवान् उद्याने ______________________ इच्छति वा । (चल्)

7. ધનુષ્યનું ચિત્ર દોરો.

**वाहनम्**

- शकटम् ગાડું
- द्विचक्रिका સાઈકલ
- वायुयानम् હવાઈજહાજ (વિમાન)
- जलयानम् વહાણ